विषय-संस्कृत, बी॰ए॰ स्नातक (प्रतिष्ठा)
प्रथमवर्ष, प्रथम पत्र
कुमारसम्भव - पञ्चमसर्ग
पद्यांश व्याख्या -

डॉ॰ ओम प्रकाश आर्य
महाराजा कॉलेज, आरा
दिनांक - 06/10/2020

निशम्य चैनां तपसे कृतोद्यमाम्
सुतां गिरीशप्रतिसक्तमानसाम् ।
उवाच मेना परिरभ्य वक्षसा
निवारयन्ती महतो मुनिव्रतात् ॥3॥

अन्वयः -
मेना गिरीशप्रतिसक्तमानसां तपसे कृतोद्यमां सुतां निशम्य एनां वक्षसा परिरभ्य महतो मुनिव्रतात् निवारयन्ती उवाच ।

पदार्थ -
मेना = पार्वती की माता, गिरीशप्रति-

सक्तमानसा = शिव के प्रति आसक्त मनवाली, तपसे = तप द्वारा, कृतोद्यमाम् = उद्योग करनेका सुताम् = पुत्री पार्वती को, निशम्य = सुनकर, एनाम् = इसको, वक्षसा परिरभ्य = गले लगाकर, महत: = बहुत कठिन, मुनिव्रतात् = तपस्या से, निवारयन्ती = रोकने के लिए, उवाच = बोली।

संस्कृतव्याख्या (मल्लिनाथ)

मेना - मेनका च गिरीशप्रतिसक्तमानसां हरासक्तचित्तां तपसे तपश्चरणाय कृतोद्यमां कृतोद्योगां सुतां निशम्य श्रुत्वेनां पार्वतीं वक्षसा परिरभ्यालिङ्ग्य महतो मुनिव्रतात्तपसो निवारयन्त्युवाच। मुनिव्रतादित्यत्र यद्यपि मुनिव्रतस्य मेनकाया अनीप्सितत्वात् 'वारणार्थानामीप्सितः' इति नापादानत्वं तथापि कृतोद्यमामिति मानसप्रवेशोक्तत्वात् 'ध्रुवमपायेऽपादानम्' इत्यपादानत्वमेव स्यात्। यथाह भाष्यकारः - 'यच्च मिथ्या संप्राप्य निवर्तते तच्च 'ध्रुवमपायेऽपादानम्' इति प्रसिद्धम्'॥ इति॥

भावार्थ-

पार्वती की सखियों के द्वारा जब मेनका को ज्ञात होता है कि पार्वती शिव में अनुरक्त हैं और वह कठिन तप करके शिव को पतिरूप में प्राप्त करने के लिए दृढ संकल्प हो गयी हैं तो वे अपनी पुत्री को गले लगाकर घोर

तप से निवृत्त करने के लिए इसप्रकार कहने लगी।

व्याकरण - गिरीशप्रतिसक्तमानसाम् - गिरेः ईशः गिरीशः, गिरीशं प्रति सक्तमानसं यस्याः सा गिरीशप्रति-सक्तमानसा, तां गिरीशप्रतिसक्तमानासाम

कृतोद्यमाम् - कृतः उद्यमः यया सा कृतोद्यमा, तां कृतोद्यमाम्। मुनिव्रतात् - मुनेः व्रतं मुनिव्रतं तस्मात् मुनिव्रतात्।

Scanned with CamScanner